श्रीकालीकासहस्रनामस्तोत्रम्
कालिकाकुलसर्वस्वे
श्रीगणेशाये नमः
ॐ श्रीगुरुभ्योनमः

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
यमासाद्य मया प्राप्त- मैश्वर्यपदमुत्तमम् ॥१॥
संयुक्तः परया भक्त्याया यथोक्तविधिना भवान् ।
कुरुतामर्चनम् देब्या त्रैलोक्यविजिगीषयः ॥२॥

श्रीपरशुराम उवाच

प्रसन्नो यदि मे देवः परमेशः पुरातनः ।
रहस्यं परया देव्याः कृपया कथय प्रभो ॥३॥
यथार्चनं विना होमं विना न्यासं विनाबलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितक्रिया ॥४॥
प्राणायामं विना ध्यानं विना भूतविशोधनं ।
विना जाप्यं विना दानं विना काली प्रसीदति ॥५॥

श्रीशङ्कर उवाच

पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशविवर्धनम् ।
भक्तानामपि भक्तोऽसि त्वमेवं साधयिष्यसि ॥६॥
देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम् ।
सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम् ॥७॥
सर्वदानन्दहृदयां वासव्यासक्तमानसाम् ।
माध्वीकमत्स्यमांसादि- रागिणीं रुधिरप्रियाम् ॥८॥
श्मशानवासिनीं प्रेत- गणनृत्यमहोत्सवाम् ।
योगप्रभां योगिनीशां योगिन्द्रहृदये स्थितां ॥९॥
तामुग्रकालिकां राम प्रसादयितुमर्हसि ।
तस्याःस्तोत्रं महापुण्यं स्वयं काल्या प्रकाशितम् ॥१०॥
तव तत्कथयिष्यामि श्रुत्वा वत्सावधारय ।
गोपनियं प्रयत्नेन पठनीयं परात्परम् ॥११॥
यस्यैककालपठना- त्सर्वेविघ्नाः समाकुलाः ।
नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥१२॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ।
तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः ॥१३॥
राजानोऽपि च दासत्वं भजन्ति च परे जनाः ।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥१४॥
निशीथे मुक्तये शंभु- र्नग्नः शक्तिसमन्वितः ।
मानसा चिन्तयेत्कालीं महाकालीति लालिताम् ॥१५॥
पठेत्सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥१६॥
वेधा ब्रह्मास्मृतेर्ब्रह्म कुसुमैः पूजिता परा ।
प्रसीदति तथा काली यथानेन प्रसीदति ॥१७

अथ कालिसहस्रनामस्तोत्रम्

अस्य कालिकासहस्रनामस्तोत्रस्य महाकालभैरव ऋषिः अनुष्टुप्छन्दः श्मशानकालिका देवता माहाकालि-काप्रसाद सिध्यर्थे जपे विनियोगः

ध्यानम्

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम् ।
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम् ॥
मुण्ढमालाधरां देवीं लोलज्जिव्हां दिगम्वराम् ।
एवं सञ्चिन्तयेत्कालीं श्मशानालयवासिनीम् ॥

अथ स्तोत्रम्

ॐ क्रीं महाकाल्यै नमः

ॐ श्मशानकालिका काली भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥१८॥
कालिका कालरात्रीश्च माहाकालनितम्बिनी ।
कालभैरवभार्या च कुलवर्त्मप्रकाशिनी ॥१९॥
कामदा कामिनी काम्या कमनीयस्वभाविनी ।
कस्तुरीरसनीलाङ्गी कुञ्जरेश्वरगामिनी ॥२०॥
ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी ।
कामार्त कामरूपा च कामधेनुः कलावती ॥२१॥
कान्ता कामस्वरूपाच कामाख्य कुलपालिनी ।
कुलीना कुलवत्यम्बा दुर्गा दुर्गार्तिनाशिनी ॥२२॥
कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशाङ्गी च क्रीङ्गकारी कमला कला ॥२३॥
करालास्या कराली च कुलकांताऽपराजिता ।
उग्र चोग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥२४॥
नीला घना बलाका च मात्रामुद्रापिताऽसिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तबत्सला ॥२५॥
महेश्वरी च चामुण्डा वाराही नरसिंहिका ।
वज्राङ्गी वज्रकङ्काली नृमुण्डस्रग्विणी शिवा ॥२६॥
मालिनी नरमुण्डाली गलद्रक्तविभूषणा ।
रक्तचन्दनसिक्तङ्गी सिन्दुरारुणमस्तका ॥२७॥
घोररूपा घोरद्रट्रा घोराघोरतरा शुभा ।
महाद्रट्रा माहामाया सुदती युगदन्तुरा ॥२८॥
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।
शारदेन्दुप्रसन्नास्या स्फुरत्स्मेरांबुजेक्षेणा ॥२९॥
अट्टहासप्रसन्नास्या स्मेरबक्त्रा सुभाषीणी ।
प्रसन्नपद्मबदना स्मितास्य पृयभाषीणी ॥३०॥
कोटराक्षी कुलश्रेष्ठा महती बहुभाषीणी ।
सुमतिः कुमतीश्चण्डा चण्डमुण्डातिबेगिनी ॥३१॥
प्रचण्डा चण्डिका चण्डि चर्चिका चण्डबेगीनी ।

सुकेशी मुक्तकेशी च दीर्घकेशी महत्कचा ॥३२॥
प्रेतदेहा कर्णपूरा प्रेतपाणीसुमेखला ।
प्रेतासना पृयप्रेता प्रेतभूमीकृतालया ॥३३॥
श्मशानबासिनी पुण्या पुण्यदा कुलपण्डिता ।
पुण्यलया पुण्यदेहा पुण्यश्लोकि च पावनी ॥३४॥
पुत्रा पवित्रा परमा पुरापुण्याविभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खडगपाणिनी ॥३५॥
नृमुण्डहस्तशस्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शान्ता पिनोन्नतस्तनी ॥३६॥
दिगम्बरा घोरराबा सृक्कान्ता रक्तबाहिनी ।
घोरराबा शिवा खड्गा विसङ्गा मदनातुरा ॥३७॥
मत्ता प्रमत्ता प्रमदा सुधासिन्धुनिवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥३८॥
गीतपृया वाद्यरता प्रेतनृत्यपरायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥३९॥
कात्यायनी जगन्माता जगती परमेश्वरी ।
जगद्बन्धुर्जगद्धात्री जगदानन्दकारीणी ॥४०॥
जगन्मयी हैभवती महामाया महामहा ।
नागयज्ञोपवीताङ्गी नागीनी नागशायिनी ॥४१॥
नागकन्या देवकन्या गन्धर्वी किन्नरेश्वरी ।
मोहरात्री महारात्री दारुणा भासुराम्बरा ॥४२॥
विद्याधरी वसुमती यक्षीणी योगनी जरा ।
राक्षसी डाकिनी वेद-मयी वेदविभूषणा ॥४३॥
श्रुति स्मृतिर्महाविद्या गुह्यविद्या पुरातनी ।
चिन्त्याऽचिन्त्या स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥४४॥
अपर्णा निश्चला लोला सर्वविद्या तपस्वीनी ।
गङ्गा काशी शची सीता सती सत्यपरायणा ॥४५॥
नीतीसुनीतिस्सुरुचि- स्तुष्टीः पुष्टीधृति क्षमा ।
वाणी बुद्धीर्महालक्ष्मी- र्लक्ष्मीनील सरवती ॥४६॥
स्रोतस्वति सरस्वती मातङ्गी विजया जया ।
नदी सिन्धुः सर्वमयी तारा सुन्यनिवासिनी ॥४७॥
शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी ।
स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनुरूपिणी ॥४८॥
परमाणुस्वरूपा च चिदानन्दस्वरूपिणी ।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥४९॥
सुनन्दा नन्दिनी स्तुत्या स्तवनीयस्वभाविनी ।
रङ्गिनी टङ्किनी चित्रा विचित्रा चित्ररूपिणी ॥५०॥
पद्मा पद्मालया पद्म- मुखि पद्मविभूषणा ।
डाकिनी शाकिनी क्षान्ता राकिनी रुधिरपृया ५१॥
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ।

उपेद्राणी महेन्दाणी ज्योत्स्ना चन्द्रस्वरूपीणी ॥५२॥
सूर्यात्मिका रुद्रपत्नि रौद्री स्त्री प्रकृति पुमान् ।
शक्तिर्मुक्तिर्मतिर्माता भुक्तिमुक्तिः पतिब्रता ॥५३॥
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ।
सर्वज्ञा सिद्धिदा सिद्धा भव्या भव्या भयापहा ॥५४॥
कर्त्रीहर्त्री पालयित्रि शर्वरी तामसी दया ।
तमिस्रा तामसी स्थाष्णुः स्थिरा धिरा तपस्विनी ॥५५॥
चार्वंगी चञ्चला लोल- जीव्हा चारु चरित्रिणी ।
त्रपा त्रपावति लज्जा विलज्जा हरयौवती ॥५६॥
सत्यवति धर्मनिष्ठा श्रेष्ठा निष्ठुरबादिनी ।
गरिष्ठा दुष्ठसंहन्त्रि विशिष्ठा श्रेयशी घृणा ॥५७॥
भीमा भयानका भीम-नादिनि भीः प्रभावती ।
वागीश्वरी श्रीर्यमुना यज्ञकर्ती यजुःपृया ॥५८॥
ऋक्सामाथर्वनिलया रागीणी शोभना सुरा ।
कलकण्ठी कम्बुकण्ठी वेणुविणापरायणा ॥५९॥
वंशिनी वैष्णवि स्वच्छा धात्री त्रिजगतीश्वरी ।
मधुमति कुण्डलिनी ऋद्धिः शुद्धिः शुचिस्मिता ॥६०॥
रम्भोर्वशी रतीरामा रोहिणी रेवती मखा ।
शङ्खिनी चक्रिणी कृष्ण गदिनी पद्मिनी तथा ॥६१॥
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ।
पिनाकधारिणी धूम्रा सुरभी वनमालिनी ॥६२॥
रथिनी समरप्रीता वेगिनी रणपण्डिता ।
जटिनी बज्रिणी नीला लावण्याम्बुदचन्द्रिका ॥६३॥
बलिपृया सदापुज्या दैत्येन्द्रमथिनी तथा ।
महिसासुरसंहर्त्री कामिनी रक्तदन्तिका ॥६४॥
रक्तपा रुधिराक्ताङ्गि रक्तखर्परधारीणी ।
रक्तपृया मांसरुचि- र्वासवासक्तमानसा ॥६५॥
गलच्छोणितमुण्डाली कण्ठमालाविभूषणा ।
शवासना चितान्तस्था महेशी वृषवाहिनी ॥६६॥
व्याघ्रत्वगम्बरा चीन-चैलिनी सिंहवाहिनी ।
वामदेवी माहादेवी गौरी सर्वज्ञभामीनी ॥६७॥
बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ।
सुभ्रुविलासीनी ब्रह्म- वादिनी ब्राह्मणी शती ॥६८॥
सुप्तवती चित्रलेखा लोपमुद्रा सुरेश्वरी ।
अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुरागीणी ॥६९॥
मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्तका ।
मानदा मानिनी मान्या माननीया मदातुरा ॥७०॥
मदिरामेदुरोन्मादा मेध्या साध्या प्रशादिनी ।
सुमध्यानन्तगुणीनी सर्वलोकोत्तमोत्तमः ॥७१॥
जयदा जित्वरी जैत्री जयश्रीर्जयशालिनी ।

सुखदा शुभदा सत्या सभासङ्क्षोभकारीणी ॥७२॥
शिवदुति भूतिमती बिभूती र्भूषणानना ।
कौमारी कुलजा कुन्ति कुलस्त्री कुलपालिका ॥७३॥
कीर्तियशस्विनी भूषा भूष्टा भूतपतिपृया ।
सुगुणा निर्गुणाऽधिष्टा निष्टा काष्टा प्रकाशिनी ॥७४॥
धनिष्टा धनदा धान्या वसुधा सुप्रकाशिनी ।
उर्वी गुर्वी गुरुश्रेष्ठा षड्गुणा त्रिगुणात्मिका ॥७५॥
राज्ञामाज्ञा महाप्रज्ञा सुगुणा निगुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवना ॥७६॥
कामदेवकला रामा- ऽभिरामा शिवनर्तकी ।
चिन्तामणिः कल्पलता जाग्रती दीनवत्सला ॥७७॥
कार्तिकी कृत्तिका कृत्या अयोध्या विषमा समा ।
सुमन्त्रा मन्त्रिणी घूर्णा ल्हादिनी ल्केशनाशिनी ॥७८॥
त्रैलोक्य जननीह्रिष्टा निर्मांसामलरूपिणी ।
तडागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥७९॥ अवन्ति
मधुरा ह्रिद्या त्रैलोक्यपावनाक्षमा ।
व्यक्ताऽव्यक्ताऽनेकमूर्ति शारभी भीमनादिनी ॥८०॥
क्षमङ्करी शाङ्करी च सर्वसंमोहकारीणी ।
उर्द्धतेजस्विनी ल्किन्ना महातेजस्मिनी तथा ॥८१॥
अद्वैता योगीनी पुज्या सुरभी सर्वमङ्गला ।
सर्वपृयङ्करी भोग्या धनिनी पिशितासना ॥८२॥
भयङ्करी पापहरा निष्कलङ्का वशङ्करी ।
आशा तृष्णा चन्द्रकला निद्राणा वायुवेगिनी ॥८३॥
सहस्रसूर्यसंकाशा चन्द्रकोटिसमप्रभा ।
निशुम्भशुम्भसंहर्त्री रक्तविजविनाशिनी ॥८४॥
मधुकैटभसंहर्त्री महिषासुरघातिनी ।
बन्हिमन्डलमध्यस्था सर्वतत्वप्रतिष्ठिता ॥८५॥
सर्वाचारवती सर्व- देवकन्याऽतिदेवता ।
दक्षकन्या दक्षयज्ञ-नाशिनी दुर्गतारीणी ॥८६॥
इज्या पूज्या विभा भूतिः सत्किर्तिर्ब्रह्मचारिणी ।
रंभोरूश्चतुरा राका जयन्ति वरुणा कुहूः ॥८७॥
मनस्विनी देवमाता यशस्या ब्रह्मबादिनी ।
सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥८८॥
आधाररूपिणी ध्येया मूलाधारनिवासिनी ।
आज्ञा प्रज्ञा पूर्णमना श्चन्द्रमुख्यनुकूलिनी ॥८९॥
वावदूका निम्ननाभिः सत्यसन्धा दृडब्रता ।
आन्विक्षिकि दण्डनीति- स्त्रयी त्रिदिवसुन्दरी ॥९०॥
ज्वालिनी ज्वलिनी शैल-तनया विन्धवासिनी ।
प्रत्यया खेचरी धैर्या तुरीया विमलाऽऽतुरा ॥९१॥
प्रगल्भा वारुणी क्षामा दर्शिनी विस्फुलिङ्गिनी ।

भक्तिः सिद्धिः सदाप्राप्तिः प्रकाम्या महिमाऽणिमा ॥९२॥
ईक्षासिद्धिवसित्वा च इशित्यौर्ध्वनिवासिनी ।
लघिमा चैव सावित्री गायत्री भूवनेश्वरी ॥९३॥
मनोहरा चिता दिब्या देव्युदारा मनोरमा ।
पिङ्गला कपिला जिब्हा रसज्ञा रसिका रसा ॥९४॥
सुषुम्नेडा योगवती गान्धारी नवकान्तका ।
पाञ्चाली रुक्मिणी राधा राध्या भीमा च राधिका ॥९५॥
अमृता तुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीर-जननी वीरसुन्दरी ॥९६॥
उग्रतारा यशोदाख्या देवकी देवमाननिता ।
निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥९७॥
कुलरागीश्वरी ज्वाला मात्रीका द्रावीणी द्रवा ।
योगीश्वरी महामारी भ्रामरी विन्दुरूपिणी ॥९८॥
दुति प्राणश्वरी गुप्ता बहुला डामरी प्रभा ।
कुब्जीका ज्ञानिनी ज्येष्ठा भुशुण्डि प्रकटाकृति ॥९९॥
द्राविणी गोपिनी माया कामविजेश्वरी प्रिया ।
शाकम्भरी कोकनदा सुसत्या च तिलोत्तमा ॥१००॥
अमेया विक्रमा क्रुरा सम्यक्छीला त्रिक्रिमा ।
स्वस्तिहब्यवहा प्रीति-रुक्मा धूम्रार्चिरङ्गदा ॥१०१॥
तपिनी तापिनी विश्व- भोगदा धारीणी धरा ।
त्रिखण्डा रोधिनी वश्या सकला शब्दरूपिणी ॥१०२॥
बीजरूपा महामुन्द्रा वशिनी योगरूपिणी ।
अनङ्गकुसुमाऽनङ्ग-मेखलाऽनङ्गरूपिणी ॥१०३॥
अनङ्गमदनाऽनङ्ग- रेखानङ्गकुशेश्वरी ।
अनङ्गमालिनी कामे- श्वरी सर्मार्थसाधिका ॥१०४॥
सर्वतन्त्रमयी सर्व- मोदिन्याऽनन्द रूपिणी ।
वज्रेश्वरी च जयिनी सर्वदुःखक्षयङ्करी ॥१०५॥
षडङ्गयुवती योगे- युक्ता ज्वालांशुमालिनी ।
दुराशया दुराधारा दुर्जया दुर्गरूपिणी ॥१०६॥
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ।
हंसेश्वरी त्रिलोकस्था शाकंभर्यनुरागिणी ॥१०७॥
त्रिकोणनिलया नित्या परमामृतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥१०८॥
त्वरीता भक्तिसंयुक्ता भक्तिवस्या सनात्तनी ।
भक्तानन्दामयी भक्त- भाविता भक्तशङ्करी ॥१०९॥
सर्वसौन्दर्यनिलया सर्वसौभाग्यशालिनी ।
सर्वसंभोगभवना सर्वसौख्यानुरूपिणी ॥११०॥
कुमारीपुजनरता कुमारीब्रतचारीणी ।
कुमारीभक्तिसुखिनी कुमारीरूपधारीणी ॥१११॥
कुमारीपुजकप्रीता कुमारीप्रीतीदप्रिया ।

कुमारीसेवकासङ्गा कुमारीसेवकालया ॥११२॥
आनन्दभैरवी बाल- भैरवी बटुभैरवी ।
श्मसानभैरवी काल-भैरवी पुरभैरवी ॥११३॥
महाभैरवपत्नी च परमानन्दभैरवी ।
सुरानन्दभैरवी च उन्मादानन्दभैरवी ॥११४॥
यज्ञानन्दभैरवी च तथा तरुणभैरवी ।
ज्ञानानन्दभैरवी च अमृतानन्द भैरवी ॥११५
महाभयङ्करी तीव्रा तीव्रबेगा तरस्विनी ।
त्रिपुरा परमेशानी सुन्दरी सुरसुन्दरी ११६॥
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासीनी ।
महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ॥११७॥
महाङ्कुशस्वरूपाच महाचक्रेश्वरी तथा ।
नवचक्रेश्री चक्रे- श्वरी त्रिपुरमालिनी ॥११८॥
राजचक्रेश्वरी राज्ञी महात्रिपुरसुन्दरी ।
सिन्दुरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी ॥११९॥
सर्वाङ्गसुन्दरी रक्ता- रक्तवस्त्रोत्तरीयका ।
यवायावकसिन्दुर्- रक्तचन्दनधारिणी ॥१२०॥
यवायावकसिन्दुर- रक्तचन्दन रूपधृक् ।
चमरी वालकुटिला निर्मला श्यामकेशिनी ॥१२१॥
वज्रमौक्तिकरत्नाढ्या किरीटकुण्डलोज्ज्वला ।
रत्नकुण्डलसंयुक्ता स्फुरद्गण्डमनोरमा ॥१२२॥
कुञ्जरेश्वरकुम्भोत्थ-मुक्तारञ्जितनासिका ।
मुक्ताविद्रुममाणिक्य- हाराद्यस्तमण्डला ॥१२३॥
सूर्यकान्तेन्दुकान्ताण्ढ्या स्पर्शाश्मगलभूषणा ।
बीजपूरस्फुरद्बीज- दन्तपंक्तिरनुत्तमा ॥१२४॥
कामकोदण्डकाभुग्न- भ्रूकटाक्षप्रवर्षिणी ।
मातङ्गकुम्भवक्षोजा- लसत्कनकदक्षिणा ॥१२५॥
मनोज्ञशष्कुलीकर्णा हंसीगतिविडम्बनी ।
पद्मराजाङ्गदद्योत- द्दोश्चतुष्कप्रकाशिनी ॥१२६॥
कर्पूरागरुकस्तुरी- कुङ्कुमद्रवलेपिता ।
विचित्ररत्नपृथिवी- कल्पशाखितलस्थिता ॥१२७॥
रत्नदीपस्फुरद्रत्न- सिंहासननिवासीनी ।
षट्चक्रभेदनकरी परमानन्दरूपिणी ॥१२८॥
सहस्रदलपद्मान्ता चन्द्रमण्डलवर्तिनी ।
ब्रह्मरूपा शिवक्रोडा नानासुखविलासिनी ॥१२९॥
हरविष्णुविरिंचेन्द्र- ग्रहनायकसेविता ।
शिवा शैवा च रुद्राणी तथैव शिवनादिनी ॥१३०॥
महादेवप्रिया देवी तथैवानङ्गमेखला ।
डाकीनी योगिनी चैव तथोपयोगिनी मता ॥१३१॥
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ।

अलंबुसा भोगवती क्रोधरूपा सुमेखला ॥१३२॥
गान्धारी हस्तिजिह्वा च इडा चैव शुभङ्करी ।
पिङ्गला दक्षसूत्री च सुषुम्ना चैव गान्धिनी ॥१३३॥
भगात्मिका भगाधरा भगेशी भगरूपिणी ।
लिङ्गाख्या चैव कामेशी त्रिपुरा भैरवी तथा ॥१३४॥
लिङ्गगीतिस्सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ।
लिङ्गमाला लिङ्गभवा लिङ्गालिङ्गा च पावकी ॥ १३५॥
भगवती कौशिकी च प्रेमारूपा प्रियंवदा ।
गृध्ररूपी शिवारूपा चक्रेशी चक्ररूपधृक् ॥१३६॥
आत्मयोनिब्रह्मयोनि- र्जगद्योनिरयोनिजा ।
भगरूपा भगस्थात्री भगिनी भगमालिनी ॥१३७॥
भगात्मिका भगाधारा रूपिणी भगशालिनी ।
लिङ्गाभिधायिनी लिङ्ग-प्रिया लिङ्गनिवासिनी ॥१३८॥
लिङ्गस्था लिङ्गिनी लिङ्ग-रूपिणी लिङ्गसुन्दरी ।
लिङ्गगीति र्महाप्रीति-र्भगगीति र्महासुखा ॥१३९॥
लिङ्गनामसदानन्दा भगनामसदारतिः ।
भगनामसदानन्दा लिङ्गनाम सदारतिः ॥ १४०॥
लिङ्गमालकराभूषा भगमालाविभूषणा ।
भगलिङ्गामृतवृता भगलिङ्गामृतात्मिका ॥१४१॥
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी ।
भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥१४२॥
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता ।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता ॥१४३॥
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ।
स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ॥१४४॥
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता ।
स्वयम्भूपुष्पनिरता-स्वयम्भूकुसुमाग्रहा ॥ १४५॥
स्वयम्भूपुष्पयज्ञेशा स्वयम्भूकुसुमालिका ।
स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमार्चिता ॥१४६॥
स्वयम्भूकुसुमादान- लालसोन्मत्तमानसा ।
स्वयम्भूकुसुमानन्द-लहरी स्निग्धदेहिनी ॥४७॥
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ।
स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ॥१४८॥
स्वयम्भूकुसुमास्निग्धा स्वयम्भूकुसुमात्मिका ।
स्वयम्भूपुष्पकरिणी स्वयम्भूपुष्पमालिका ॥१४९॥
स्वयम्भूकुसुमन्यासा स्वयम्भूकुसुमप्रभा ।
स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी ॥१५०॥
स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी ।
स्वयम्भूकुसुमानन्दा स्वयम्भूपुष्पपुष्पीणी ॥१५१॥

स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी ।
स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ॥१५२॥
स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा ।
स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पपूर्णिता ॥१५३॥
स्वयम्भूपूजकप्राज्ञा स्वयम्भूहोत्रिमात्रिका ।
स्वयम्भूदातृरक्षित्री स्वयम्भूभक्तभाविका ॥ १५४॥
स्वयम्भूकुसुमप्रीता स्वयम्भूपूजकप्रिया ।
स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका ॥१५५॥
स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्रिणी ।
स्वयम्भूप्रदसस्मेरा स्वयम्भूतशरीरिणी ॥१५६॥
सर्वलोकोद्भवप्रीता सर्वकालोद्भवात्मिका ।
सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा ॥१५७॥
कुन्दपुष्पसमाप्रीतिः कुन्दपुष्पसमारतिः ।
कुन्दगोलोद्भवप्रीता कुण्डगोलोद्भवात्मिका ॥१५८॥
स्वयंभूर्वा शिवा शक्ता पाविनी लोकपाविनी ।
किर्तिर्यशस्विनी मेधा विमेधा सुरसुन्दरी ॥१५९॥
अश्विनी कृत्तिका पुष्या तेजस्वी चन्द्रमण्डला ।
सूक्ष्मा सूक्ष्मप्रदा सूक्ष्मा- सूक्ष्मभयविनाशिनी ॥१६०॥
वरदाऽभयदा चैव मुक्तिबन्धविनाशिनी ।
कामुकी कामदा क्षान्ता कामाख्या कुलसुन्दरी ॥१६१॥
सुखदा दुःखदा मोक्षा मोक्षदार्थप्रकाशिनी ।
दुष्टादुष्टमती चैव सर्वकार्यविनाशिनी ॥१६२॥
शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी ।
शुक्रालया शुक्रभोगा शुक्रपूजा सदारतिः ॥१६३॥
शुक्रपूज्या शुक्रहोम- सन्तुष्टा शुक्रवत्सला ।
शुक्रमूर्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी ॥१६४॥
शुक्रस्था शुक्रिणी शुक्र- संस्पृहा शुक्रसुन्दरी ।
शुक्रस्नाता शुक्रकरी शुक्रसेव्याऽतिशुक्रिणी ॥१६५॥
महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायीनी ।
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता ॥१६६॥
शुक्रानन्दकरी शुक्र- सदानन्दविधायीनी ।
शुक्रोत्साहा सदाशुक्र- पूर्णा शुक्रमनोरमा ॥१६७॥
शुक्रपूजकसर्वस्था शूक्रनिन्दकनाशिनी ।
शुक्रात्मिकाच्छुक्रसंप- च्छुक्राकर्षण कारिणी ॥१६८॥
रक्ताशया रक्तभोगा रक्तपूजासदारतीः ।
रक्तपूज्या रक्तहोमा रक्तस्था रक्तबत्सला ॥१६९॥
रक्तपूर्णा रक्तदेहा रक्तपूजकपुत्रिणी ।
रक्ताख्या रक्तिनी रक्त- संस्पृहा रक्त सुन्दरी ॥१७०॥
रक्ताभिदेहा रक्तार्हा रक्तवन्धकवन्दीता ।
महारक्त रक्तभबा रक्तवृष्टिविधायिनी ॥१७१॥

रक्तस्नाता रक्तपृता रक्तसेब्याऽतिरक्तिनी ।
रक्तानन्दकरी रक्त- सदानन्दविधायिनी ॥१७२॥
रक्तारक्ता रक्तपूर्णा रक्तसेब्यक्षिणीरमा ।
रक्तसेबकसर्वस्वा रक्तनिन्दकनासीनी ॥१७३॥
रक्तात्मिका रक्तरूपा रक्ताकर्षणकारिणी ।
रक्तोत्साहा रक्तब्यग्रा रक्तपानपरायणाः ॥१७४॥
शोणितानन्दजननी कल्लोलस्निग्धरूपिणी ।
साधकान्तर्गता देवी-पार्वती पापनाशिनी ॥१७५॥
साधूसनांह्रिदिसंस्थात्री साधकानन्दकारीणी ।
साधकानां च जननी साधकपृयकारीणी ॥१७६॥
साधकप्रचुरानन्द- संपत्तिसुःखदायिनी ।
साधका साधकप्राणा साधकसक्तमानसा ॥१७७॥
साधकोत्तमसर्वस्वा- साधकभक्त रक्तपा ।
साधकानन्दसंतोषा साधकारिविनाशिनी ॥१७८॥
आत्मविद्या ब्रह्मविद्या परब्रह्मकुटुम्बिनी ।
त्रिकूटस्था पञ्चकूटा सर्वकूटासरीरिणी ॥१७९॥
सर्ववर्णमयि सर्व- जपमालाविधायिनी ।
इति श्रीकालीकानाम्नां सहस्रं शिवभाषितम् ॥१८०॥

फलश्रुति

गुह्याद् गुह्यतरं साक्षा- न्महापातकनासनम् ।
पूजाकाले निशीथे च संध्ययोरुभयोरपी ॥१॥
लभते गाणपत्यं स यः पठेत्साधकोत्तमः ।
यः पठेत्पाठद्वापि शृणोति श्रावयेदपि ॥२॥
सर्वपापविनिमुक्तः स याति कालिकापदम् ।
श्रद्धयाऽश्रद्धया वापि यः कचिन्मानवः पठेन् ॥३॥
दुर्गादुर्गतरं तीर्त्वा स याति कालिकापदम् ।
वन्ध्या वा काकवन्ध्या च मृतपुत्रा च याङ्गना ॥४॥
श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजिविनः ।
यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् ॥५॥
देवीवरप्रशादेन तं तं प्राप्नोति नित्यसः ।
स्वयभूकुसुमैः शुक्लैः सुगन्धिकुसुमान्वितै ॥६॥
गुरुविष्णुमहेशाना- मभेदेनमहेश्वरी ।
समन्ताद्भावयेन्मन्त्री महेशो नात्र संशयः ॥७॥
स शाक्तः शिवभक्ताश्च स एव वैष्णवोत्तमः ।
संपूज्य स्तैति यः काली- मद्वैतभावमावहन् ॥८॥
देव्यानन्देन सानन्दो देवीभक्तैकभक्तिमान् ।
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसः ॥९॥
कामयित्वायथाकामं स्तवमेनमुदीरयेत् ।
सर्वरोगैः परित्यक्तो जायते मदनोपमः ॥१०॥
चक्रं वा स्तवमेनं वा धारयेदङ्गसङ्गतम् ।

विलिख्य विधिवत्साधुः स एव कालिकातनुः ॥११॥
देव्यै निवेदितं यद्य-त्तस्यांशं भक्षयेन्नरः ।
दिव्यदेहधरो भूत्वा देव्याः पार्श्वधरो भवेत् ॥१२॥
नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः ।
रक्तपानोद्यतासर्वा मांसास्थिचर्वणोद्यतः ॥१३॥
तस्मान्निवेदितं देव्यै दृष्ट्वा श्रुत्वा च मानवः ।
न निन्देन्मनसा वाचा कुष्ठव्या धिपराङ्मुखः ॥१४॥
आत्मानं कालिकात्मानं भावयन् स्तौति यः शिवाम् ।
शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥१५॥
यस्यालये तिष्ठति नून मेतत् ,
स्तोत्रं भवान्या लिखितं विधिज्ञैः ।
गोरोचना लक्तक कुङ्कुमाक्त-
कर्पूरसिन्दूरमधुद्रवेण ॥१६॥
न तत्र चोरस्य भयं न हास्यो ,
न वैरिभि र्नाऽशनिविन्हिभीति ।
उत्पातवायोरपि नात्रशङ्का,
लक्ष्मीः स्वयं तत्र वसेदलोला ॥१७॥
स्तोत्रं पठेत्तदनन्तपुण्यं
देवीपदाम्भोजपरो मनुष्यः ।
विधानपूजाफलमेव सम्यक्,
प्राप्नोति सम्पूर्णमनोरथोऽसौ ॥१८॥
मुक्ताः श्रीचरणारविन्दनिरताः, स्वर्गामिनो भोगिनो ,
ब्रह्मोपेन्द्रशिवात्मकार्चरता, लोकेऽपि संलेभिरे ।
श्रीमच्छङ्करभक्तिपूर्वकमहा, देवीपदध्यायिनो ,
मुक्ति र्भुक्तिमतिः स्वयं स्तुतिपरा
भक्तिः करस्थायिनी ॥१९॥

इति श्रीकालिकाकुलसर्वस्वे हरपरशुरामसंवादे
श्रीकालिकासहस्रनामस्तोत्रम् सम्पूर्णम् ॥

कालीअष्टोत्तरशतनामस्तोत्रम्

ध्यानम्

खड्गं चक्रगदेषुचापपरिघाञ्छुलं भुशुडीं शिरः ,
शङ्ख संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां ,
यामस्तौत्स्वपिते हरौ कमलजोहतुं मधुं कैटभम् ।

अथ शतनामस्तोत्रम्

भैरव उवाच

शतनाम प्रवक्षामि कालिकाया वरानने ।
यस्य प्रपठनाद्वाग्मी सर्वत्र विजयी भवेत् ॥१॥
काली कपालिनी कान्ता कामदाकामसुन्दरी ।
कालरात्रिः कालिका च कालभैरवपूजिता ॥२॥
कुरुकुल्ला कामिनी च कमनीयस्वभाविनी ।

कुलिना कुलकर्त्री च कुलवर्त्मप्रकाशिनी ॥३॥
कस्तुरीरसनिला च काम्या कामस्वरूपिणी ।
काकारवर्णनिलया कामधेनुः करालिका ॥४॥
कुलकान्ता करालास्या कामार्त च कलावती ।
कृशोदरी च कामाख्या कौमारी कुलपालिनी ॥५॥
कुलजा कुलकन्या च कलहा कुलपूजिता ।
कामेश्वरी कामकान्ता कुञ्जेश्वरहर्गामिनी ॥६॥
कामदात्री कामहर्त्री कृष्णा चैव कपर्दिनी ।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ॥७॥
काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा ।
क्रींरूपा कुलगम्या च कमला कृष्णपूजिता ॥८॥
कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी ।
कम्बुकण्ठीकौलिनी च कुमुदा कामजीविनी ॥९॥
कुलस्त्री कीर्तिका कृत्या कीर्तिश्च कुलपालिका ।
कामदेवकला कल्प-लता कामाङ्गवर्धिनी ॥१०॥
कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका ।
कादम्बिनी कमलिनी कृष्णनन्दप्रदायिनी ॥११॥
कुमारीपूजनरता कुमारीगणशोभिता ।
कुमारीरञ्जनारता कुमारीव्रतचारिणी ॥१२॥
कङ्काली कमनीया च कामशास्त्रविशारदा ।
कपालखट्बाङ्गधरा कालभैरवरूपिणी ॥१३॥
कोटरी कोटराक्षी च काशीकैलासवासिनी ।
कात्यायनी कार्यकरी काव्यशास्त्रप्रमोदिनी ॥१४॥
कामाकर्षणरूपा च कामपीठनिवासिनी ।
कङ्गिनी काकिनी क्रीडा कुत्सिता कलहप्रिया ॥१५॥
कुण्डगोलोद्भवप्राणा कौशिकी कीर्तिवर्धिनी ।
कुम्भस्तनीकटाक्षा च काव्या कोकनदप्रिया ॥१६॥
कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा
इति तेकथितं देवि गुह्याद् गुह्यतरं परम् ॥१७॥
प्रपठेद्य इदं नित्यं कालीनामशताष्टकम् ।
त्रिषु लोकेषु देवेशि तस्यासाध्यं न विद्यते ॥१८॥
प्रातःकाले च मध्याह्ने सायाह्ने च सदा निशि ।
यः पठेत्परया भक्त्या कालीनामशताष्टकम् ॥१९॥
कालिका तस्य गेहे च संस्थानं वुलरुते सदा ।
शून्यागारे श्मशाने वा प्रान्तरे जलमध्यतः ॥२०॥
वह्निमध्ये च संग्रामे तथा प्राणस्यसंशये ।
शताष्टकं जपन्मन्त्री लभते क्षममुत्तमम् ॥२१॥
कालीं संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकै ।
साधक : सिद्धिमाप्नोतिकालिकायाः प्रसादतः ॥२२॥
॥ इति शाक्तप्रमोदे श्रीकाल्यष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥

लक्ष्मी पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥२८॥
इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
भार्गवी लोकजननी क्षीरसागरकन्यका ॥२९॥
१४नाम शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥३२॥ भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥३३॥ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरुपाक्षस्त्रिलोचनः ॥३४॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥३५॥ गङ्गाधरोऽधकरिपुः क्रतुध्वंसी वषध्वजः ।
व्योमकेशो भवो भीमः स्थणू रुद्र उमापति ॥३६॥ अहिबुध्न्योऽष्टमूर्तिश्चगजारिश्चमहानटः ।
उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥३८॥ शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥३९ ॥ आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः१६॥
धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥१७॥ नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः ॥१८॥

फलश्रुतिः

इत्यवं नामसाहस्रं कथितंते घटोभव ।
रहस्यानं रहस्यं च ललिता पृतिदायकम् ।
अनेन सदृसं स्तोत्रं नभूतंनभविष्यति ।
सर्वरोगप्रशमनं सर्वसंपत्प्रवर्धनम् ।
सर्वपमृत्युशमनं दिर्घायुष्यप्रदायकम् ॥
यवा यावक सिन्दुर रक्तचन्दन संयुतैः ।

मत्स्यमांसा दिभिर्वीरो मधुधिः साज्यपायसैः ॥७॥
भक्तचोपनीतै मन्त्रेण साधितैः शक्तिभिः सह ।
पञ्चोपचार नैवेद्यै बलिभि बहुशोणीतैः ॥८॥
धूपदिपै र्माहादेवी पूजयित्वा मनोहरैः ।
जप्त्वामंत्रं महास्तोत्रं पठेत् भक्तिसमन्वितः ॥९॥
अनन्यचेताः स्थिरधी मुक्तकेशो दिगम्बरः ।
शबारुढा श्चितास्थोबा श्मशान लयमागतः ॥१०॥
शून्यालय गतोबापि शय्यास्थो वापि साधकः ।
सभवेत् कालीकापुत्रो इतिख्याति मुपागतः ॥११॥
सर्वविद्यावतां श्रेष्ठो धनेनच धनाधिपः ।
वायूतुल्यबलोलोकेदुर्जयशत्रुमर्दनः ॥१९२॥
सर्वसंङ्कटसंतिर्णः सवसिद्धिमन्वितः ।

मधुमत्यास्यंदेव्यासेव्यमानः स्मरोपमः ॥१९३॥
महेशइवयमेगीन्द्रःसर्वशत्रुपुरस्कृतः ।

कालिकाकामरुपोसौ सर्वकर्सणकारकः ॥१९४॥
जलसूर्येन्दुवायुनांस्तम्भकोरानवल्लभः ।

यशस्वीसत्कविर्धिमान् सन्मन्त्रीकोकिलस्वरः ॥१९५॥
बहुपुत्रोगजास्वानामीस्वरोधार्मीकःकृति ।
मार्कण्यय इवायुस्मान् जरापलितवर्जितः ॥१९६॥
नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक् ।
बहुकिंकथ्यतांतस्य जठतःस्तवमुत्तमम् ॥१९७॥
नकिञ्चिद्दुर्लभं लोकेयद्य न्नसिकल्पितम् ।
ब्रह्महत्या सुरापानं स्तुत्यं गुर्वङ्ग नागमः ॥१९८॥
सर्वमा शुतरत्यव स्वस्यास्य प्रसादतः ।
रनस्वला भगंपश्यन् जप्त्वाकालि महामनुम् ॥१९९॥
स्तवेनानेन संस्तुत्य साधकःकिनसाधयत् ।
परदार परोवापि जप्त्वामन्त्रम् स्वंपठेत् ॥२००॥
कुबेर इव वित्ताढ्यो जायते मदनो पमः ।
अष्टोत्तर शतंजप्त्वा योनीमामन्त्र्य भक्तितः ॥२०१
सङ्गम्य पठना दस्य सर्वसिद्धे श्वरोभवेत् ।
दिगम्बरो मुक्तकेशः शय्यास्थो मैथुनीनरः २०२॥
जप्त्वास्तुत्वा महादेवीं खेचरो जायते चिरात् ।
शुक्रो सरण कालेतु जपपुजा परायणः ॥२०३॥
श्मशानकालीकां स्तुत्वावाणीवत्सकवीभवेत् ।

आलोकयन् चिन्तयन्वा विवस्त्रां परयोषितम् ॥
२०४॥ जप्त्वा स्तुत्वा महेशानीं सर्वपापात्प्रमुच्यते ।
सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवाम् ॥२०५॥
सर्वपापैः परित्यक्तो मानवः स्यात्सुरोपमः ।
कुहूपूर्णे दुसंक्रन्त्यां चतुर्दयष्टमीषु च ॥२०६॥
नवम्यां मङ्गलदिने पठेत् स्तोत्रं प्रयत्नतः ।
भौमावास्यानिशीथे च चतुष्पथगतो नरः ॥२०७॥
मांसभक्रबलिं दद्यात्सदुग्धं मीमशोणितम् ।
अष्टोत्तर शतं जप्त्वा पठेन्नाम सहस्रकम् ॥२०८॥
सुदर्शनो भवेदाद्यु सर्व गन्धर्व सेवितः ।
सदाशिवो मवत्येष जन्माशाभ्या सयोगतः ॥२०९॥
येनकेन प्रकारेण लिङ्गस्तुति परायणः ।
स्तम्भयेदखिला न्लोकान् राजानमपि मोहयेत् ॥२१०॥
आकर्षदेद्देवकन्या वशये दपि केशवम् ।
मारये दखिला न्लोका नुच्चाटयति शात्रवान् ॥२११॥
नरमार्जारमहिषछागमूषकशोणितैः ।
सास्थिमांसै रसमधुमिः सामृतैः साज्यपायसैः ॥२१२॥
योनिक्षालन तोयेन भग लिङ्गा मृतेन च ।
शुक्रैःपूजाजपान्तेयोदेवीं सन्तर्प्य साधकः ॥२१३॥
सहस्रनामभि र्देवि स्तोती भक्तिपरायण ।
मातेव कालिका यस्य सर्वत्र हितकारिणी ॥२१४॥
परनिन्दा परद्रोह परिवादपराय च ।
खलाय परतन्त्राय भ्रष्टाय साधकाय च ॥२१५॥
शिवभक्ताय दुष्टाय दूषकाय दूरात्मने ।
हरिभक्तिविहीनाय परदार पराय च ॥२१६॥
पूजाजपविहीनाय स्त्रीसुसनिन्दकाय च ।
न स्तवं दर्शयेद्दिव्यं दर्शयन् शिवहा भवेत्. ॥२१७॥
कुलीनाय महेच्छाय दुर्गा भक्तिपराय च ।
वैष्णवाय विशुद्धाय शक्ति भक्ताय मन्त्रिणे ॥२१८॥
अद्वैतानन्दरुपाय निवेदित पराय च ।
दद्यात् स्तोत्रं महादेव्याः साधकाय तथाऽऽज्ञया २१९॥
गुरुविष्णुमहेशानामभेदेनमहेश्वरी